# राजस्थान बोर्ड परीक्षा 2019-20
# 10वीं कक्षा
# तृतीय भाषा-संस्कृतम्
# मॉडल पेपर-नवम्

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :-**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत-माध्यमेन एव लेखनीयानि।

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

उत्सर्गपरम्परायाः उद्भवभूमिं, प्रतापस्य पुण्यभूमिं 'मेवाड़' राज्यं को न जानाति? इदं राज्यं शूराणां शौर्य्येण, यूनाम् आत्माहुत्या, सतीनाञ्च 'जौहर' परम्परया विश्वस्मिन् जगति महतीं प्रसिद्धिम् अलभत। मेवाड़राज्यस्य सिसोदियावंशे बप्पारावल-राणाहमीर-राणासांगा प्रभृति-वीराणां सुदीर्घा परम्परा विद्यते। अस्यामेव परम्परायां महाराणाप्रतापसिंहस्य जन्म विक्रमस्य 1597 तमे वर्षे ( 1540 ईसवीयाब्दे) ज्येष्ठ शुक्लतृतीयायाम् अभवत्। प्रतापः बाल्यकालादेव वीरयोद्धा, कुशलसेनानी, धीरनायकश्च आसीत्। पितुः उदयसिंहस्य अनन्तरं 'प्रतापः' महाराणापदवीं प्राप्य स्ववयसः 32 तमे वर्षे मेवाड़राज्यसिंहासनम् आरूढ़वान्। तस्य राज्याभिषेकः 'गोगुन्दा' ग्रामे अभवत्।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'महाराणा-प्रतापः' शीर्षक पाठ से उद्धृत है। इसमें मेवाड़ राज्य के महाराणा प्रताप का परिचय देते हुए तथा मेवाड़ राज्य के प्रतापी राजाओं का नामोल्लेख करते हुए उनके पराक्रम, साहस और स्वतंत्रता के प्रति दृढ़ता का वर्णन किया गया है।

**हिन्दी-अनुवाद-** त्याग की परम्परा का उत्पत्ति-स्थान और प्रताप की पुण्य-भूमि 'मेवाड़' राज्य को कौन नहीं जानता है? इस राज्य ने वीरों की वीरता से, युवकों के बलिदान से और सतियों (पतिव्रताओं) के 'जौहर' परम्परा से सम्पूर्ण संसार में महान् प्रसिद्धि को प्राप्त किया है। मेवाड़ राज्य के सिसोदिया वंश में बप्पारावल, राणा हमरी, राणा सांगा आदि वीरों की अत्यन्त लम्बी परम्परा है। इसी परम्परा में महाराणा प्रताप का जन्म विक्रम् संवत् 1597 वर्ष में (सन् 1540 में) ज्येष्ठ माह के शुक्ल पक्ष की तृतीया को हुआ था। प्रताप बचपन से ही वीर-योद्धा, कुशल सेनापति और धीर नायक था। पिता उदयसिंह के बाद 'प्रताप' महाराणा की पदवी प्राप्त करके अपनी आयु के 32वें वर्ष में मेवाड़ राज्य के सिंहासन पर विराजमान हुए। उनका राज्याभिषेक 'गोगुन्दा' गाँव में हुआ।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

'इळा न देणी आपणी' इति मातृशिक्षां पालयन्, 'धर्म्याद् हि युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते' इति गीतोपदेशं च परिपालयन् राष्ट्रधर्म-रक्षणाय प्राणान् पणीकृत्य अपि युध्यमानः 25 पौषः 1763 ई. इति दिवसे रणे चाभिमुखे हतः।

प्रताप इव, शिवाजी इव, बन्दा बैरागी इव, गुरुगोविन्दसिंह इव च महाराजस्य सूरजमल्लस्य परमः प्रभावः अद्यापि इतिहासे गुञ्जति इव।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'महाराजः सूरजमल्लः विजयते' शीर्षक पाठ से उद्धृत है। इस अंश में भरतपुर के महाराजा सूरजमल्ल की वीरता, साहस, मातृभूमि के प्रति समर्पण की भावना और इसकी रक्षा के लिए अपने प्राण न्यौछावर करने का प्रेरणास्पद वर्णन किया गया है।

**हिन्दी-अनुवाद-** 'अपनी मातृभूमि नहीं देनी चाहिए'- इस मातृ-शिक्षा का पालन करते हुए और "धर्मपूर्वक युद्ध करने के अतिरिक्त क्षत्रीय के लिए अन्य कुछ भी कल्याणकारी नहीं है"- इस गीता के उपदेश का पालन करते हुए राष्ट्रधर्म की रक्षा के लिए प्राणों की बाजी लगाकर भी युद्ध करते हुए 25 दिसम्बर सन् 1763 ई. के दिन युद्ध में शत्रुओं का सामना करते हुए मृत्यु को प्राप्त हुए।

प्रताप के समान, शिवाजी के समान, बन्दा बैरागी के समान और गुरु गोविन्द सिंह के समान महाराज सूरजमल का अत्यधिक प्रभाव आज भी इतिहास में गूँज रहा है।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

वीरकदम्बैरतिकमनीयां सुधीजनैश्च परमोपास्याम्।
वेद-पुराणैर्नित्यसुगीतां राष्ट्रसुभक्तैरीडयां भव्याम्।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत पद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'भारत-वैभवम्' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ श्रीजी महाराज द्वारा रचित 'भारत-भारती-वैभवम्' नामक ग्रन्थ से संकलित है। इस पद्य में

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

कवि भारत देश की विभिन्न विशेषताओं का वर्णन एवं उसकी वन्दना करते हुए कहता है कि–

**हिन्दी–अनुवाद–** वीर–पुरुषों के समूहों से अतिसुन्दर, विद्वानों द्वारा अत्यधिक उपासनीय, वेदों और पुराणों के द्वारा निरन्तर जिसका गान किया जाता है, राष्ट्र–भक्तों से जिसकी भव्य स्तुति की गई है तथा विशाल भारत–भूमि की मैं वन्दना करता हूँ।

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
प्रासादशिखरस्थोऽपि काको न गरुडायते।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत पद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'सुभाषित–रत्नानि' शीर्षक पाठ से उद्धृत है। इस पद्य में गुणों से ही गौरवता के प्राप्त होने का उदाहरणसहित वर्णन करते हुए कहा गया है कि–

**हिन्दी–अनुवाद–** मनुष्य गुणों से गौरव को प्राप्त करता है, केवल उच्च आसन (पद) पर बैठने से नहीं। जैसे कौआ भवन के शिखर पर स्थित होने पर भी गरुड़ के समान आचरण वाला नहीं होता है।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वराष्ट्र–गौरवम्' इति शीर्षकपाठाद् उद्धृतम्। अस्मिन् पद्ये श्रीरामस्य माध्यमेन मातुः मातृभूमेश्च महत्त्वं प्रकटितम्। श्रीरामः लंकाविजयानन्तरं लक्ष्मणं प्रति कथयति यत्–

**संस्कृत–व्याख्या–** हे लक्ष्मण! स्वर्णनिर्मितामपि लंका मह्यं नहि रोचते। यतोहि माता मातृभूमिश्च स्वर्गलोकादपि गुरुतरा अर्थात् श्रेष्ठा भवति।

**विशेषः–** अत्र स्वर्गापेक्षया मातुः मातृभूमेश्च महत्त्वं प्रेरणास्पदं वर्तते। यथा मातुः महत्त्वे तथैव मातृभूमेः।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतश्लोकः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित–रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् श्लोके परिश्रमस्य गुरुसेवायाश्च महत्त्वं वर्णितम्।

**संस्कृत–व्याख्या–** गुरुगतां विद्यां कः प्राप्नोतीति वर्णयन् कविः कथयति यत् येन प्रकारेण मनुष्यः खननसाधनेन भूमेः खननं कृत्वा जलं प्राप्नोति, तथैव जिज्ञासु सेवापरायणः वा गुरोः स्थितं ज्ञानं प्राप्नोति। अर्थात् जिज्ञासु जनः एव गुरोः ज्ञानं प्राप्तुं शक्यते।

**विशेषः–** प्रस्तुतश्लोके कविना गुरुसेवायाः परिश्रमस्य च प्रेरणा प्रदत्ता। गुरुसेवया एव विद्याप्राप्तिः भवति।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**द्वितीयसर्वदारः** – (उत्थाय साञ्जलिः) नहि नहि महाराज! यत्र–यत्र भवान् गमिष्यति, तत्र–तत्र वयम् अपि अनुगमिष्यामः।

**प्रतापः** – एवं न वाच्यम्। भवन्तः अत्र स्थित्वा एव मातृभूमेः सेवां कुर्वन्तु।

**तृतीयसर्वदारः** – नहि भगवन्! अस्माकं सेवाः भवता सह सन्ति। वयं तु भवता सह एव निवत्स्यामः।

**प्रतापः** – यद् रोचते भवद्भ्यः, कुर्वन्तु। न अहं भवतः विवशान् करोमि।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दना' इत्यस्य 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते। अस्मिन् अंशे यवनाधिपतिना अकबरेण सह मेवाड़ाधिपतेः महाराणाप्रतापस्य युद्ध वर्णनप्रसङ्गे प्रतापस्य कर्त्तव्यबुद्धिः तथा प्रतापस्य सहचराणां प्राणार्पणैरपि प्रतापं प्रति समर्पणभावनायाः चित्रणं वर्तते।

**संस्कृत–व्याख्या–**

**द्वितीयसर्वदारः** – (उत्थाय अञ्जलिं बध्वा च) नहि नहि महाराज! एवं मा वदतु। भवान् यत्र कुत्रापि यास्यति, तत्रैव वयमपि अनुचलिष्यामः। वयं तु भवतः अनुचराः, सेवकाश्च स्मः।

**प्रतापः** – इत्थं न कथनीयम्। अहं भवताम् कृतज्ञः अस्मि। भवता वीरतया धैर्येण च स्वदेशस्य रक्षणार्थं महान्तं सहयोगं कृतम्। अत एव भवन्तः सर्वे अत्रैव स्थित्वा स्वमातृभूमेः सेवां कुर्वन्तु।

**तृतीयः सर्वदारः** – हे भगवन्! इत्थं भवितुं न शक्नोति। वयं तु भवतः सेवकाः स्मः, भवता सहैव अस्माकं सेवाः सन्ति। अत एव भवान् यत्र निवत्स्यति तत्रैव वयमपि निवासं करिष्यामः।

**प्रतापः** – यथा भवदभ्य रोचते, तथैव कुर्वन्तु। अहं भवतः विवशान् न करिष्यामि।

**विशेषः** – प्रस्तुतनाट्यांशे महाराणाप्रतापस्य राष्ट्रं प्रति अनन्यप्रेम, कष्टपरायणता चाभिव्यक्ता। अत्रैव प्रतापस्य सहचराणमपि दृढस्वामिभक्तिः समर्पणभावना च प्रकटिता।

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

(नेपथ्ये)।

मा खलु चापलं कुरु। कथं गत एवात्मनः प्रकृतिम्?

**राजा** – (कर्णं दत्वा) अभूमिः इयम् अविनयस्य। को नु खल्वेषः निषिध्यते? (शब्दानुसारेण अवलोक्य) (सविस्मयम्) अये, को नु खलु अयम् अनुबध्यमानः तपस्विनीभ्याम् अबालसत्त्वो बालः?

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयं महाकविकालिदासविरचितस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमांकात् संकलितः। अंशेऽस्मिन् राजा दुष्यन्तः यदा महर्षेः मारीचस्य आश्रमं प्रविशति तदा तत्र बालकस्य सर्वदमनस्य सिंहशिशुक्रीडां व्यवहारचञ्चलतां च पश्यतीति वर्णितम्–

**संस्कृत–व्याख्या–** (नेपथ्यतः ध्वनिः श्रूयते)

चञ्चलतां न करोतु। एषः तु स्वस्य स्वभावमेव प्राप्नोति किम्?

**राजा दुष्यन्तः**– (ध्यानपूर्वकं श्रुत्वा) एतत् चञ्चलतायाः स्थानं नास्ति। अयं बालकः केन निवार्यते? (शब्दानुसारेण दृष्ट्वा) (आश्चर्येण सह) भो! एषः कः निश्चयेन तपस्विनीभ्याम् अनुसरणं कृत्वा अवरुध्यमानः असाधारण–शक्तिसम्पन्नः बालकः?

येन स्वमातुः दुग्धम् अर्धम् एव पीतम्, यश्च आकर्षणेन अस्तव्यस्तकेशयुक्तं केशरिशावकं क्रीडां कर्तुं बलपूर्वकम् आकर्षति।

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाऐंगे।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु- 3

1. कविः कस्य चरणयोः प्रणमति?
2. कपोताः कथं सिद्धिं प्राप्तवन्तः?
3. 'वन्देमातरम्' गीतम् केन लिखितम्?
4. सर्पः केन मार्गेण गङ्गदत्तस्यालयं गतः?
5. सूरजमल्लः केन विरुदेन भूषितः?
6. दुर्जनानां विद्या कस्मै भवति?
7. धनं प्राप्य महाराणाप्रतापः किं उद्घोषयति?
8. 'विजयतां महाराजः' सर्वदारे इति कथिते प्रतापः किम् अकथयत्?

**उत्तरम् :**

1. कविः भगवत्याः सुरभारत्याः चरणयोः प्रणमति।
2. चित्रग्रीवस्य वचनं श्रुत्वा सर्वे एकचित्तीभूय खगाः जालमादाय उत्पतिताः एवं ते सिद्धिं प्राप्तवन्तः।
3. 'वन्देमातरम्' गीतं वंकिमचन्द्रेण लिखितम्।
4. सर्पः अरघट्टघटि्टकामार्गेण गंगदत्तस्यालयं गतः।
5. सूरजमल्लः 'जाट-प्लेटो' इति विरुदेन भूषितः।
6. दुर्जनानां विद्या विवादाय भवति।
7. धनं प्राप्य महाराणा उद्घोषयति-अद्य अस्माद् एव क्षणाद् राणा स्वदेशस्य पारतन्त्र्य शृंखलाः त्रोटयितुं शत्रून् संहारयितुम् धर्मं रक्षितुम् च योत्स्यते योत्स्यते अवश्यमेव योत्स्यते।
8. 'विजयध्वनिं कृत्वा किं त्वमपि मां लज्जसे' इति प्रतापः अकथयत्।

**निर्देशः प्रश्न संख्या 6-9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु-**

**6.** तीर्थानि मन्दिराणि च विध्वंस्तानि क्रियन्ते स्म। 1

**उत्तरम् :**

कानि विध्वंस्तानि क्रियन्ते स्म?

**7.** सूर्यमल्ल मिश्रणः वंशभास्कर ग्रन्थे लिखति। 1

**उत्तरम् :**

सूर्यमल्ल मिश्रणः कस्मिन् ग्रन्थे लिखति?

**8.** परोपकाराय सतां विभूतयः। 1

**उत्तरम् :**

परोपकाराय केषां विभूतयः?

**9.** गङ्गदत्तः कृष्णसर्पं कोटरे धृतवान्। 1

**उत्तरम् :**

गङ्गदत्तः कम् कोटरे धृतवान्?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. पात्रापात्र- विवेकोऽस्ति धेनुपन्नगयोः इव।
   तृणात्संजायते क्षीरं क्षीरात्संजायते विषम्।
2. केशवं पतितं दृष्ट्वा, द्रोणः हर्षमुपागतः।
   रुदन्ति कौरवाः सर्वे, हा! हा! केशव केशव।।

**11.** अधोलिखितंगद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु-

संस्कृतभाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदास-सदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणौ अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति। भारतसर्वकारस्य राजचिह्ने प्रयुक्तां सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति। एतमेव राष्ट्रिय शैक्षिकानुसन्धानप्रशिक्षण-परिषदः ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु-
   (क) अर्थशास्त्रं केन रचितम्? 1
   (ख) कस्य कृते संस्कृतमेव सर्वोत्तमा भाषा विद्यते? 1
   (ग) भारतसर्वकारस्य राजचिह्नं किम् अस्ति? 1
   (घ) विद्ययाऽमृतमश्नुते कस्य ध्येय वाक्यम्? 1
   (ङ) केषां कवीनां काव्यसौन्दर्यम् अनुपमम्? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु-
   (क) "सर्वोत्तमा भाषा विद्यते" अत्र विशेषणपदं किम्? 1
   (ख) "सङ्गणकविशेषज्ञाः कथयन्ति" अत्र कर्तृपदं लिखत। 1
   (ग) 'अविचार्य' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। 1
   (घ) "सूक्तयः स्वीकृताः सन्ति" इत्यत्र क्रियापदं लिखत। 1

**उत्तरम् :**

1. संस्कृतभाषायाः महत्त्वम्।
2. (क) चाणक्येन।
   (ख) संगणकस्यकृते।
   (ग) भारतसर्वकारस्य राजचिह्नं "सत्यमेव जयते" इति अस्ति।
   (घ) 'विद्ययाऽमृतमश्नुते' इति ध्येयवाक्यं राष्ट्रिय शैक्षिकानुसन्धान प्रशिक्षण-परिषदः वर्तते।
   (ङ) कालिदास सदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्।
3. (क) सर्वोत्तमा।
   (ख) सङ्गणकविशेषज्ञाः।
   (ग) विचार्य।
   (घ) सन्ति।

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।

1. मध्वरि 1
2. हरिंवन्दे 1

**उत्तरम् :**

1. मधु + अरि (यण् सन्धिः)।
2. हरिम् + वन्दे (अनुस्वार सन्धिः)

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. नै + अकः 1
2. वाक् + दानम् 1

**उत्तरम् :**

1. नायकः (अयादि सन्धिः)
2. वाग्दानम् (जश्त्व सन्धिः)

**14.** अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहं अथवा विग्रहं पदानां समासं कृत्वा समासस्य नामापि लिखत-

1. ग्रामस्य समीपे नदी वहति। 1
2. कृष्णसर्पः भयंकरः। 1
3. योगश्च क्षेमश्च तौ रक्षणीयौ। 1

**उत्तरम् :**

1. उपग्रामम्/उपग्रामे, अव्ययी भाव समासः
2. कृष्णः सर्पः, कर्मधारय समासः
3. योगक्षेमौ, द्वन्द्व समासः

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत्–

1. राजमार्गम् अभितः वृक्षाः सन्ति। 1
2. साधुः पादेन खञ्जः अस्ति। 1
3. हरिः वैकुण्ठम् अध्यास्ते।

**उत्तरम् :**

1. द्वितीया विभक्तिः, 'अभितः' योगे।
2. तृतीया विभक्तिः, विकृतअंगवाचकपदयोगे।
3. द्वितीया विभक्तिः, 'अधि' उपसर्गपूर्वकं आस् धातुयोगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानि पूरयित्वा लिखतु।

1. मया ग्रन्थः (पठ् + तव्यत्) ..........। 1
2. तस्मिन् (मानव + तल्) .......... किञ्चित् न अस्ति। 1

**उत्तरम् :**

1. पठितव्यः
2. मानवता

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. कालस्य बन्धुत्वम् न अस्ति। 1
2. समाजसेवा करणीया। 1

**उत्तरम् :**

1. बन्धु + त्व
2. कृ + अनीयर् + टाप्

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| यथा, तावत्, खलु, अत्र |
|---|

1. अहं .......... बहिः न गमिष्यामि। 1
2. यः जीवने .......... करोति। 1
3. .......... कुशलम्। 1

**उत्तरम् :**

1. अहं तावत् बहिः न गमिष्यामि।
2. यः जीवने यथा करोति।
3. अत्र कुशलम्।

**निर्देशः– प्रश्न संख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** सीता दुग्धं पिबति। 1

**उत्तरम् :**

सीतया दुग्धं पीयते।

**20.** मया जलं पीयते। 1

**उत्तरम् :**

अहं जलं पिबामि।

**21.** अहं क्रीडामि। 1

**उत्तरम् :**

मया क्रीड्यते।

**22.** घटिकाचित्र सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–





1. पंजीकरणं प्रातः .......... प्रारभत। 1
2. भाषण प्रतियोगिता .......... आरभत। 1

**उत्तरम् :**

1. पंजीकरणं प्रातः सार्धनववादने प्रारभत।
2. भाषणप्रतियोगिता सपाददशवादने आरभत।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. भवती किं कुर्वन्ति? 1
2. त्वं पुस्तकं पठामि। 1
3. मह्यं फलानि रोचन्ति। 1

**उत्तरम् :**

1. भवत्यः किं कुर्वन्ति?
2. अहं पुस्तकं पठामि।
3. मह्यं फलानि रोचन्ते।

**24.** भवती सविता। जयपुरे निवसति रामगंजम्। स्वस्य दिनचर्याविषयकं स्वसखीं रीना प्रति पत्रं लिखतु। 4

**उत्तरम् :**

रामगंज
जयपुरतः
दिनांकः– 20.03.20....

प्रियसखि रीना!
सस्नेहं नमस्ते।

अत्र सर्वं कुशलम्। भवती अपि कुशलिनी इत्यहं कामये। अद्य चिरात् भवत्यपत्रं प्राप्तम्। अहम् अतीव हर्षम् अनुभवामि। भवती मम दिनचर्यां ज्ञातुम् इच्छति। अतोऽहम् अत्र मे दिनचर्यां लिखामि।

सखि! अहं प्रातः पंचवादने उत्तिष्ठामि। सार्धपंचवादनात् सार्धषड्वादनपर्यन्तं प्रातः भ्रमणं करोमि। ततः स्नानादिभिः निवृत्य नववादनतः दशवादनपर्यन्तम् अध्ययनं करोमि। दशवादने विद्यालयं गच्छामि। सायं पंचवादने विद्यालयात् आगत्य क्रीडाङ्गणे क्रीडामि। सप्तवादने अहं भोजनं भुक्त्वा पठामि गृहकार्यं च करोमि। रात्रौ दशवादने शये। मातापित्रोः चरणयोः मे प्रणत्यः।

भवदीया प्रिय सखी,
सविता

**अथवा**

**24.** चरित्र–प्रमाण–पत्रं प्राप्त्यर्थं प्रार्थनापत्रं मंजूषायाः उचित पदैः पूरयत– 4

| **मंजूषा–** प्रदाय, भाषायः, पत्रस्य, भवन्तः, प्रधानाचार्यमहोदयः, कारणात्, वर्तते, प्रतियोगितायाम् |
|---|

सेवायाम्
श्रीमन्तः ..........

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

राजकीयः उच्च माध्यमिक विद्यालयः,
जयपुरम्।
**विषयः**– चरित्र–प्रमाण–पत्र–प्राप्त्यर्थं प्रार्थना–पत्रम्।
महोदयः,

सविनयं निवेदनम् अस्ति यत् अहं आंग्ल ........... वाद–विवाद .......... भागं ग्रहीतुम् इच्छामि। एतत् .......... चरित्र–प्रमाण ......... आवश्यकता ...........।

अतः प्रार्थना अस्ति यत् मह्यं चरित्र–प्रमाण–पत्रं ........... अनुग्रहीष्यन्ति ...........।
सधन्यवादम्।
दिनांकः– 15.08.20.... भवदाज्ञाकारी शिष्यः
अनूपः

**उत्तरम् :**
सेवायाम्
श्रीमन्तः प्रधानाचार्य महोदयः,
राजकीयः उच्च माध्यमिक विद्यालयः,
जयपुरम्।
**विषयः**– चरित्र–प्रमाण–पत्र–प्राप्त्यर्थं प्रार्थना–पत्रम्।
महोदयः,

सविनयं निवेदनम् अस्ति यत् अहं आंग्ल भाषायः वाद–विवाद प्रतियोगितायां भागं ग्रहीतुम् इच्छामि। एतत् कारणात् चरित्र–प्रमाण–पत्रस्य आवश्यकता वर्तते।

अतः प्रार्थना अस्ति यत् मह्यं चरित्र–प्रमाण–पत्रं प्रदाय अनुग्रहीष्यन्ति भवन्तः।
सधन्यवादम्।
दिनांकः– 15.08.20.... भवदाज्ञाकारी शिष्यः
अनूपः

**25.** मंजूषायाः उपयुक्तपदानि गृहीत्वा 'धूम्रपान निवारणाय' इति विषये गुरु शिष्ययोः संवादं पूरयतु। 4

**मञ्जूषा–** गन्तुम्, अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीया, मया, दुर्व्यसनस्य

**सोहनः** – गुरुवर! अहं पश्यामि विद्यालये केचन छात्रा .......... कुर्वन्ति।
**गुरुः** – वत्स! धूम्रपानं .......... विनाशकमस्ति।
**सोहनः** – गुरुवर! कोऽस्य ............ निवारणोपायः।
**गुरुः** – पुत्र! जन–जागर्तिरेव ........... दुर्व्यसनस्य निवारणोपायः।
**सोहनः** – गुरुवर! .......... किं करणीयम्?
**गुरुः** – त्वया छात्राः .......... यत् अस्माभिः धूम्रपानं न करणीयम्।
**सोहनः** – गुरुवर! ........... किं करणीयम्।
**गुरुः** – वत्स! महत्वपूर्ण विषयोपरि वार्तां कर्तुं .......... धन्यवादं ददामि।

**उत्तरम् :**
**सोहनः** – गुरुवर! अहं पश्यामि विद्यालये केचन छात्रा धूम्रपानं कुर्वन्ति।
**गुरुः** – वत्स! धूम्रपानं स्वास्थ्य विनाशकमस्ति।
**सोहनः** – गुरुवर! कोऽस्य दुर्व्यसनस्य निवारणोपायः।
**गुरुः** – पुत्र! जन–जागर्तिरेव अस्य दुर्व्यसनस्य निवारणोपायः।
**सोहनः** – गुरुवर! मया किं करणीयम्?
**गुरुः** – त्वया छात्राः प्रेरणीया यत् अस्माभिः धूम्रपानं न करणीयम्।
**सोहनः** – गुरुवर! एवमेव करोमि! अधुना अहं गन्तुम् इच्छामि।
**गुरुः** – वत्स! महत्वपूर्ण विषयोपरि वार्तां कर्तुं तुभ्यं धन्यवादं ददामि।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. कवियों में कालिदास श्रेष्ठ हैं।
2. गंगा हिमालय से निकलती है।
3. आलस्य मत करो।
4. परिश्रम का फल मीठा होता है।
5. गरीबों को धन दो।
6. परिश्रम से विद्या आती है।

**उत्तरम् :**
1. कविषु कालिदासः श्रेष्ठः।
2. गंगा हिमालयात् प्रभवति।
3. आलस्यं मा कुरु।
4. परिश्रमस्य फलं मधुरं भवति।
5. दरिद्रेभ्यः धनं देहि।
6. परिश्रमेण विद्या आयाति।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि रचयतु– 3

**मञ्जूषाः–** दुग्धदातृषु, कृषिप्रधाने, द्वौ शृंगौ, वसिष्ठ ऋषिः, अनेक वर्णाः, स्वभावेन।



**उत्तरम् :**
**वाक्यानि–**
1. अस्माकं कृषिप्रधाने देशे धेनूनाम् बहुमहत्त्वं वर्तते।
2. दुग्धदातृषु पशुषु धेनूनां प्रमुखं स्थानं वर्तते।
3. वसिष्ठ ऋषिः कामधेनोः पालनं करोति सम।
4. धेनोः द्वौ शृंगौ सर्वैः पूजनीयौ स्तः।
5. धेनूनाम् अनेकवर्णाः भवन्ति।
6. धेनवः स्वभावेन अतीव सरलाः भवन्ति।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मंजूषायाः सहायतया पूरयित्वा लिखतु– 3

**मञ्जूषा–** जनाः, ग्रामे, अत्र, कृषिः, रोचते, जीवनं।

अहं .......... निवसामि। अस्मिन् ग्रामे अनेक जातीनां .......... वसन्ति। तेषाम् आजीविका .......... अस्ति। ......... ते अत्यन्तसरलाः भवन्ति। ते स्नेहेन .......... यापयन्ति। मह्यं ग्राम्यजीवनम् अतीव ..........।

**उत्तरम् :**
अहं ग्रामे निवसामि। अस्मिन् ग्रामे अनेक जातीनां जनाः वसन्ति। तेषाम् आजीविका कृषिः अस्ति। अत्र ते अत्यन्तसरलाः भवन्ति। ते स्नेहेन जीवनं यापयन्ति। मह्यं ग्राम्यजीवनम् अतीव रोचते।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. तस्य चत्वारः पुत्राः आसन्–रामः, लक्ष्मणः, भरतः, शत्रुघ्नः, च।
2. वानराः सागरे सेतु निर्माणम् अकुर्वन्।
3. तत्र रावणः सीतां कपटेन अहरत्।
4. राम–रावणः युद्धः अभवत्, युद्धे रावणः हतः।
5. प्राचीनकाले दशरथः नृपः राज्यम् अकरोत्।
6. पितुः आज्ञया राज्यं त्यक्त्वा रामः वनम् अगच्छत्।

**उत्तरम् :**

1. प्राचीनकाले दशरथः नृपः राज्यम् अकरोत्।
2. तस्य चत्वारः पुत्राः आसन्–रामः, लक्ष्मणः, भरतः, शत्रुघ्नः, च।
3. पितुः आज्ञया राज्यं त्यक्त्वा रामः वनम् अगच्छत्।
4. तत्र रावणः सीतां कपटेन अहरत्।
5. वानराः सागरे सेतु निर्माणम् अकुर्वन्।
6. राम–रावणः युद्धः अभवत्, युद्धे रावणः हतः।

*******

सत्र 2020–21 से नये पाठ्यक्रमानुसार सभी कक्षाओं के सभी विषयों की टेक्स्ट बुक एवं सभी प्रकार की सहायक अध्ययन सामग्री विद्यार्थियों को मोबाइल पर व्हाट्सएप द्वारा एवं वेबसाइट www.rbse.online पर उपलब्ध करवायी जाएगी। इसके लिये विद्यार्थियों से किसी भी प्रकार का कोई शुल्क नहीं लिया जाएगा। इसके लिये विद्यार्थियों को किसी भी प्रकार का कोई OTP Verification या Email द्वारा Verification नहीं देना होगा। हमारा व्हाट्सएप नम्बर जानने या अन्य किसी भी प्रकार की जानकारी के लिये वेबसाइट www.rbse.online पर विजिट करें।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।